दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् आषाढ़शुक्लद्वादशी
श्रावण 10 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-276 | 1 | जुलाई 26, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 विदेशेषु निवसन्तः भारतीयाः स्वमातृभूम्या सह दृढतया सम्बद्धाः सन्ति तथा च प्रत्येकः भारतीयः स्वस्य उपलब्धीभिः समर्पणेन च गर्वानुभवं कारयति - राष्ट्रपतिः द्रौपदी मुर्मू

3 विदेशात् एम.बी.बी.एस. (MBBS) कृतवतां स्नातकानाम् 'इंटर्नशिप' अवधिः एकवर्षं भविष्यति, मुख्यमंत्री सुक्खुमहोदयेन दत्ताः निर्देशाः

5 स्क्वैशक्रीडा- भारतस्य अनाहत-सिंहः विश्व-कनिष्ठ-स्क्वैश-स्पर्धायाः उपाधिं जित्वा इतिहासम् अरचयत्

## दीर्घगतिरोधानन्तरं शिक्षा मन्त्री धर्मेंद्र प्रधानः प्रधानमन्त्रिणे नरेन्द्र मोदिने स्वत्यागपत्रम् समर्पितवान्




हिमसंस्कृतवार्ता। शिक्षा मन्त्री धर्मेंद्र प्रधानः प्रधानमन्त्रिणे नरेन्द्र मोदिने स्वत्यागपत्रम् समर्पितवान्। सामाजिक-माध्यम-सञ्चारे तेन उक्तं यत् विगत-दशदिनेभ्यः छात्राणां विरोध-प्रदर्शनैः उत्पन्नायाः स्थितेः कारणेन सः व्यथितः अस्ति, एषः च तस्य कृते व्यक्तिगत-प्रतिष्ठायाः विषयः नास्ति। श्रीधर्मेंद्र प्रधानः अकथयत् यत् जंतर-मंतर-स्थले सम्पूर्णदेशे च वर्तमान-स्थितेः राष्ट्रविरोधि-शक्तयः अनुचित-लाभं मा नयेयुः तथा च कस्यापि छात्रस्य भविष्यं विधिक-जटिलतासु न निमज्जेत्, अतः तेन प्रधानमन्त्रिणे त्यागपत्र-समर्पणस्य निर्णयः गृहीतः। श्रीधर्मेंद्र प्रधानः प्रधानमन्त्रिणः नरेन्द्र मोदिनः मार्गदर्शनस्य, विश्वासस्य, निरन्तर-सहयोगस्य च कृते आभारं प्रकटीकृतवान्। तेन उक्तं यत् राष्ट्रसेवा तस्य जीवनस्य सर्वोच्च-प्राथमिकता अस्ति, सः च अस्यै सदा समर्पितः स्थास्यति। श्रीधर्मेंद्र प्रधानः अकथयत् यत् नीट-यूजी-परीक्षायाम् अनियमिततानां पश्चात् सर्वकारेण अन्वेषणं सीबीआई-संस्थायै समर्पितं परीक्षा च निरस्ता कृता आसीत्। सर्वकारेण पुनःपरीक्षायाः नवीना तिथिः अपि उद्घोसिता आसीत्। तेन उक्तं यत् सर्वकारेण आगमि-वर्षतः एषा परीक्षा संगणकाधारित-रूपेण आयोजयितुं निर्णयः गृहीतह्। श्रीधर्मेंद्र प्रधानः अकथयत् यत् अस्य कृते भारतसर्वकारम्, राज्यसर्वकारान्, मण्डल-प्रशासनानि च संयोज्य 'समग्र-सर्वकार' दृष्टिकोणः अङ्गीकृतः। तेन उक्तं यत् छात्राणां अभिभावकानां च सहयोगेन परीक्षा २१ जून, २०२६ दिनाङ्के सफलतापूर्वकम् आयोजिता। श्रीधर्मेंद्र प्रधानः अकथयत् यत् सः प्रथमदिनादेव पूर्णमुत्तरदायित्वं गृहीतवान्, कदापि च अस्याः स्थितेः विमुखः न अभवत्। तेन उक्तं यत् १६ जुलाइ-दिनाङ्के उद्घोषिताः नीट-यूजी-परीक्षायाः परिणामः सन्तोषप्रदः आसीत्, यस्मिन् वंचित-पृष्ठभूमेः अनेके मेधाविनः छात्राः साफलतां प्राप्तवन्तः। तेन अकथयत् यत् अस्मिन् अन्तराले अपि उत्तरदायि-पदेषु उपविष्टाः केचन जनाः बाधाः उत्पादयितुं छात्रान् मार्गभ्रष्टान् कर्तुं च प्रयासम् अकुर्वन्। तेन उक्तं यत् अनेन कृत्येन तस्मै तीव्रं दुःखम् अभवत्।

### केंद्रीयमन्त्री प्रल्हाद जोशी नवीनः शिक्षामन्त्री भविष्यति

केंद्रीयमन्त्री प्रल्हाद जोशी, धर्मेंद्र प्रधानस्य त्यागपत्रानन्तरं नवीनः शिक्षामन्त्री भविष्यति। श्रीजोशिने तस्य वर्तमान-मन्त्रालयस्य अतिरिक्ते शिक्षामन्त्रालयस्य प्रभारः समर्पितः। श्रीजोशी, सम्प्रति उपभोक्ता-कार्य, खाद्य-तथा-सार्वजनिक-वितरण एवं नवीन-तथा-नवीकरणीय-ऊर्जा-मन्त्री-पदे कार्यरतः अस्ति। राष्ट्रपतिः द्रौपदी मुर्मूः धर्मेंद्र प्रधानस्य केंद्रीय-मंत्रिपरिषदः त्यागपत्रं तत्काल-प्रभावेण स्वीकृतवती।

### मध्यप्रदेश उच्च-न्यायालयेन परीक्षा-प्रश्न-पत्र अवैधरीत्या प्रकाशन-सम्बद्ध अनियमिततताम् आलक्ष्य चतुर्णां विशिष्ट-ट्रैक-न्यायालयानां स्थापना विहिता

मध्यप्रदेश उच्च न्यायालयेन परीक्षा-प्रश्न-पत्र अवैधरीत्या प्रकाशन-सम्बद्ध अनियमिततां आलक्ष्य चतुर्णां विशिष्ट ट्रैक-न्यायालयानां स्थापना विहिता। न्यायालयेन निर्दिष्टं यत् आरोप-पत्राणां नामांकनस्य त्रि-मासाभ्यन्तरे एतेषां प्रकरणानां निवारणं भवितव्यम्।

### जम्मू-कश्मीरे वार्षिकी अमरनाथ यात्रा, अथ च श्रीमातुः वैष्णोदेव्याः पवित्र-यात्रा षड्-दिवसीय-स्थगनानन्तरं पुनः समारब्धा

जम्मू-कश्मीरे वार्षिकी अमरनाथ यात्रा, अथ च श्रीमातुः वैष्णोदेव्याः पवित्र-यात्रा षड्-दिवसीय-स्थगनानन्तरं पुनः समारब्धा। कश्मीरस्य संभागीय आयुक्तेन अंशुल गर्गेण सूचितं यत् बालटाल पहलगाम-मार्गयोः यात्रा पुनः समारब्धा। अत्रान्तरे ऊनसप्तत्यधिक द्विशताधिक षड्सहस्रं यावत् तीर्थ यात्रिणां समूहः गतदिवसे प्रातः भगवती-नगर-यात्री-निवास-जम्मूतः प्रस्थितः।

### असम्-राज्ये जलाप्लावनेन मृतकानां सङ्ख्या एकषष्ठिः जाता; यत्र एकलक्षतोप्यधिकाः जनाः साहाय्योद्धारशिबिरेषु आश्रयम् अगृह्णन्; प्रधानमन्त्रिणा श्रीमोदिना सर्वविध साहाय्यस्य आश्वासनं प्रदत्तम्

जनाः असमराज्ये जलप्रलये पञ्चदश दशांशोत्तरैक लक्षतोप्यधिकाः साहाय्योद्धारशिविरेषु आश्रयम् अगृह्णन्। शिवसागर, चराईदेव, जोरहाट च इत्येते सर्वाधिकप्रभावितानि मण्डलानि सन्ति। जलाप्लावनेन इतोऽपि चतुर्दशः जनानां मृत्योः सूचना अस्ति, येन राज्यस्य जलाप्लावनेन मृतकानां सङ्ख्या एकषष्ठिः जाता। दिखौ, दिसांग, धनसिरी च नद्यः आपत्रेखायाः उपरि निरन्तरं प्रवहन्ति, येन स्थितिः इतोपि हानिप्रदा अभवत्। आपत-प्रतिक्रिया-दलानि, मण्डल अधिकारिणः च साहाय्योद्धारकार्ये संलग्नाः सन्ति, प्रभावितक्षेत्राणां निकटतया निरीक्षणं च कुर्वन्तः सन्ति, उपशमन-उद्धार-कार्याणि च प्रचलन्ति। प्रधानमन्त्री नरेन्द्रमोदी असम-राज्यस्य मुख्यमन्त्रिणा हिमन्ता-बिस्वा-सर्मणा सह दूरभाष-माध्यमेन वार्तालापं कृत्वा राज्यस्य जलप्रलयस्य स्थितिं समीक्षितवान्।

### प्रधानमन्त्री नरेन्द्रमोदी एकादशवादने आकाशवाणीतः 'मन की बात' इति कार्यक्रमे स्वीयं मनोगतं प्रकटयिष्यति

प्रधानमन्त्री नरेन्द्रमोदी एकादशवादने आकाशवाणीतः 'मन की बात' इति कार्यक्रमे स्वीयं मनोगतं प्रकटयिष्यति । मासिकस्य अस्य आकाशवाणी-कार्यक्रमस्य एतत् षट्त्रिंशोत्तरैक-शत-तमं संस्करणं भविष्यति। आकाशवाण्याः दूरदर्शनस्य च सर्वाभिः वाहिनीभिः अस्य कार्यक्रमस्य प्रसारणं भविष्यति। अयं हि कार्यक्रमः आकाशवाणी-वार्ता-विभागस्य अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अपि च newsonair इति चल-दूरभाषीये तन्त्रांशे अपि उपलब्धः भविष्यति।

## सुभाषितम्

**स्वाभाविकं तु यन्मित्रं, भाग्येनैवाभिजायते।
तदकृत्रिमसौहार्दम् आपत्स्वपि न मुञ्चति॥**

अर्थात्- स्वाभाविक रूप से स्नेह करने वाला (अकृत्रिम) मित्र तो प्रारब्ध से ही मिलता है, जो सच्ची मित्रता को आपत्तियों में भी नहीं छोड़ता है।

हिमसंस्कृतवार्ता:
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य समुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

### उपराष्ट्रपतिः नवदेहली-नगरे राज्य-सभायाः नवनिर्वाचितानां नामाङ्कितानां च सदस्यानां कृते द्विदिवसीय-अभिमुखीकरण-प्रशिक्षण-कार्यक्रमस्य उद्घाटन समारोहं सम्बोधितवान्



उपराष्ट्रपतिः सी. पी. राधाकृष्णन् वर्यः अधोरेखितवान् यत्, प्रतिदिनं, प्रतिहोरा, प्रतिनिमेषम्, प्रतिपलं च सदने व्यतीतं लोकतन्त्रस्य सुदृढीकरणाय उपयोक्तव्यम्। राधाकृष्णन् वर्यः नवदेहली-नगरे राज्यसभायाः नवनिर्वाचितानां नामाङ्कितानां च सदस्यानां कृते द्विदिवसीय-अभिमुखीकरण-प्रशिक्षण-कार्यक्रमस्य उद्घाटन समारोहं सम्बोधयन् आसीत्। सः अवदत् यत् वादविवादाः चर्चाः च सर्वदैव निर्णायकस्तरे नेतव्यम्।

# विदेशेषु निवसन्तः भारतीयाः

## स्वमातृभूम्या सह दृढतया सम्बद्धाः सन्ति तथा च प्रत्येकः भारतीयः स्वस्य उपलब्धीभिः समर्पणेन च गर्वानुभवं कारयति - राष्ट्रपतिः द्रौपदी मुर्मू




राष्ट्रपतिः द्रौपदी मुर्मुः इत्येषा रोमानियादेशे भारतीयसमुदायस्य योगदानस्य प्रशंसाम् अकरोत्, ते उभयोः देशयोः मध्ये वर्धमानस्य सहभागित्वस्य महत्त्वपूर्णाः स्तम्भाः इति उक्तवती । रोमानिया-देशस्य आधिकारिकयात्रायाः समापनदिने बुखारेस्ट-नगरे भारतीयसमुदायस्य कृते आयोजिते समारोहे सम्बोधयन्ती राष्ट्रपतिः अवदत् यत् विदेशेषु निवसन्तः भारतीयाः स्वमातृभूम्या सह दृढतया सम्बद्धाः सन्ति तथा च प्रत्येकः भारतीयः स्वस्य उपलब्धीभिः समर्पणेन च गर्वानुभवं कारयति । राष्ट्रपतिः अवदत् यत्, रोमानियादेशस्य राष्ट्रपतिना निकुसोर डैन इत्यनेन अन्यैः नेतृभिः च सह तस्याः संवादः द्वैपाक्षिकसम्बन्धान् नूतनौन्नत्यं प्रति नेतुं प्रतिबद्धतां प्रतिबिम्बयति। सा अवोचत् यत्, भारत-रोमानिया-देशयोः मध्ये व्यापारः, रक्षा, पुनर्नवीकरणीय ऊर्जा, डिजिटल-प्रौद्योगिकी, शिक्षा, अनुसंधान, स्वास्थ्यसेवा, विज्ञान-प्रौद्योगिकी, कृत्रिम बुद्धिमत्ता, नवान्वेषणम्, उन्नत-विनिर्माणम् इत्यादिषु क्षेत्रेषु सहकारः विस्तारितः अस्ति।

## गुजरातराज्ये प्रचण्डवृष्ट्या अनन्तरं युद्धस्तरे उद्धारकार्याणि साहाय्यकार्याणि च प्रचलन्ति



गुजरातराज्ये प्रचण्डवृष्ट्या अनन्तरं युद्धस्तरे उद्धारकार्याणि साहाय्यकार्याणि च प्रचलन्ति। गतचतुर्विंशतिहोरासु राज्यस्य पञ्चषष्ट्यधिक द्विशतं यावत् उपमंडलेषु वृष्टिः अभवत्। राज्य-उद्धारकार्य आयुक्तेन पञ्च जनानां मृत्योः पुष्टिकृतम्। अद्यावधि प्रायः सार्द्ध चत्वारिंशत् सहस्राधिकाः जनाः मोचिताः सन्ति। उत्तर-गुजराते मध्य-गुजराते च वृष्टेः अनन्तरं, सेनायाः, एन्. डी. आर्. एफ्. इत्यस्य च सप्तदश दलानि, एस्. डी. आर्. एफ्. इत्यस्य द्वात्रिंशत् दलानि च उद्धारकार्ये साहाय्यकार्ये च सम्मिलितानि सन्ति। राज्यस्य वर्तमानस्थितिं विचार्य, राज्यस्य मुख्यमन्त्री भूपेन्द्र पटेलः गान्धीनगरे उच्च-स्तरीय-समीक्षा-सभाम् आयोजितवान्। भारत-ऋतु-विभागेन आई. एम्. डी. इत्यनेन गुजरातराज्ये अत्यधिक-वृष्टेः रक्तवर्णीया पूर्वसङ्केतना प्रदत्ता अस्ति। कोङ्कण-गोवाराज्ये, मध्यप्रदेशे, ओडिशायां राजस्थाने च एतादृशी एव स्थितिः भवितुम् अर्हति। आगामि-द्वि-त्रि-दिनेषु हरियाणा-चण्डीगढ-उत्तरप्रदेश-प्रदेशेषु अपि प्रचण्डवृष्टिः भविष्यति इति विभागेन पूर्वानुमानं प्रकटितम् अस्ति। असम, मेघालय, नागालैण्ड, मणिपुर, तटीय-कर्नाटक, गङ्गेय पश्चिमबंगाल, पञ्जाब, दक्षिणान्तरिक-कर्नाटक, उत्तराखण्ड इत्येतेषु राज्येषु पृथक् स्थानेषु अपि प्रचण्डवृष्टिः भवितुम् अर्हति।

# मुकेशअग्निहोत्री अवदत्- जलशक्तिविभागे अस्मिन् वित्तवर्षे पूरयिष्यन्ते ४,००० पदानि, भविष्यति जलशुद्धीकरणम्

**हिमसंस्कृतवार्ताः- ऊना ।**

उपमुख्यमन्त्रिणा मुकेशअग्निहोत्रिणा प्रोक्तं यत् जलशक्तिविभागे अस्मिन् वित्तवर्षे प्रायः ४,००० पदेषु नियुक्तिः विधास्यते। तेन कथितं यत् पर्याप्त-जनशक्तिं विना काऽपि योजना सफला भवितुं न शक्नोति। अतः सर्वकारः विभागं सुदृढं विधातुं युवकेभ्यः जीविकाप्रदानाय च विशेषबलं यच्छन् अस्ति। उपमुख्यमंत्री शनिवासरे हरोली-क्षेत्रस्य पालकवाहसभागारे जलशक्तिविभागस्य, हमीरपुर-मण्डलस्य पक्षतः आयोजितायाः 'जलसंभरण-सेचन- योजनानां सञ्चालनं, संवर्धनं, जलगुणवत्ता-निरीक्षणम्' इति विषये एकदिवसीयायाः कार्यशालायाः अभिसंमुखीकरण-कार्यक्रमस्य च सम्बोधनं करोति स्म। अस्मिन् अवसरे तेन विभागस्य उत्कृष्टं कार्यं कुर्वन्तः कर्मचारिणः सम्मानिताः अपि कृताः। तेन नवनियुक्ताः पैरा- पम्प- ऑपरेटर, पैराफिटर, मल्टीपरपज-वर्कर, वाटर-गार्ड चेति कर्मचारिणः विभागस्य ध्वजवाहकाः प्रोक्ताः कथितं च यत् प्रदेशस्य जनेभ्यः स्वच्छं सुरक्षितं च पेयजलं प्रापयितुं तेषां महती भूमिका अस्ति। तेन उक्तं यत् तेषां भविष्यत् उज्ज्वलं वर्तते ते च धैर्येण सह कार्यं कुर्वन्तः तिष्ठेयुः। एषा ५८ वर्षीयावधिं यावत् पेंशन-लाभयुक्ता सेवा अस्ति। तेन विश्वासः प्रदत्तः यत् वर्तमानसर्वकारस्य कार्यकाले एतेषां कर्मचारिणां हितैः सम्बद्धाः निर्णायकाः निर्णयाः ग्रहीष्यन्ते।

## २,००० कोटिरूप्यकाणां व्यापका योजना प्रवर्तिष्यते

मुकेशअग्निहोत्रिणा कथितं यत् प्रदेशे पेयजलस्य गुणवत्तां परिष्कर्तुं जलशुद्धीकरणव्यवस्थां च आधुनिकीं विधातुं प्रायः २,००० कोटिरूप्यकाणां व्यापका योजना प्रवर्तिष्यते। योजनायाः अन्तर्गतं आधुनिक-प्रविधि-आधारिताः जलशुद्धीकरण-प्रणाल्यः स्थापयिष्यन्ते, येन प्रदेशवासिभ्यः स्वच्छं सुरक्षितं च पेयजलं प्राप्स्यति जलजन्यासु व्याधिषु अपि ह्रासः आगमिष्यति। तेन प्रोक्तं यत् जलशक्तिविभागः इमां योजनां चरणबद्ध-रूपेण प्रवर्त्यन् अस्ति।



## फिनासिंह- सेचनपरियोजनायै ३०० कोटिरूप्यकाणि

तेन ज्ञापितं यत् काङ्गड़ामण्डलस्य फिनासिंह-सेचनपरियोजनां पूरयितुं ३०० कोटिरूप्यकाणि स्वीकृत्य दत्तानि सन्ति। तेन उक्तं यत् प्रदेशे जलशक्तिविभागस्य कोटिशः रूप्यकाणां विकासपरियोजनासु वेगेन कार्यं प्रचलति। उपमुख्यमन्त्रिणा मादकद्रव्य-दुर्व्यसनस्य विरुद्धं निर्णायके युद्धे सर्वेषां सहयोगः आहुतः तेन प्रोक्तं यत् दुर्व्यसनसम्बद्धेषु प्रकरणेषु संलिप्ताः ३६ कर्मचारिणः सेवायाः निष्कासिताः सन्ति। तेन कथितं यत् सर्वकारः अस्मिन् विषये किमपि शैथिल्यं न सहिष्यते।

## मुकेशेन भाजपा-नेतॄन् प्रति व्यङ्ग्यपातं कृतम्

तेन उक्तं यत् विकासकार्येषु राजनीतिं कुर्वन्तः जनाः जनता सम्यक् जानाति। भाजपा-नेतॄन् प्रति व्यङ्ग्यपातं कुर्वन् तेन कथितं यत् ये स्वयं काञ्चन सिद्धिं न गणयितुं शक्नुवन्ति, तेभ्यः परेषां कृतानि विकासकार्याणि अपि न रोचन्ते। तेन प्रोक्तं यत् तस्य एकमेव लक्ष्यं स्वर्णिमस्य विकसितस्य च हरोली-क्षेत्रस्य निर्माणम् अस्ति। सः राजनीतिं न, अपि तु विकासस्य राजनीतिं विश्वसिति जनतायाः हिते च कार्यं कुर्वन् स्थास्यति। उपमुख्यमन्त्रिणा उद्घोषितं यत् आगामिसंवत्सरात् जलशक्तिविभागे उत्कृष्टं कार्यं कुर्वताम् कर्मचारिणां सम्माननस्य परम्परा आरप्स्यते। तेन कर्मचारिणः आहुताः यत् ते स्वकीयेन उत्कृष्टेन कार्येण व्यवहारेण च जनानां विश्वासं जयन्तु विभागस्य च प्रतिष्ठां इतोऽपि सुदृढां कुर्वन्तु।

# जंतर- मंतर- आन्दोलनस्य समर्थनम्- शिमलानगरे निसृता सिक्थदीप-यात्रा (कैंडलमार्च), मुख्यमन्त्री सुक्खु अपि सम्मिलितः; दत्ता श्रद्धाञ्जलिः




**हिमसंस्कृतवार्ताः- शिमला।**

देहल्याः जंतर-मतरस्थले विविधाः याचनाः आदाय आन्दोलनरतानां कॉकरोच-जनतादलस्य छात्राणां च समर्थने शनिवासरस्य सायं राजधान्यां शिमलायां सिक्थदीपयात्रा (कैंडलमार्च) निसृता। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुमहोदयः अपि अस्यां सिक्थदीप- यात्रायां सम्मिलितः अभवत्।

सिक्थदीप-यात्रायाः माध्यमेन जंतर-मंतरस्थले निरन्तरस्य आन्दोलनस्य प्रति समर्थनं प्रकटितम्। एषा सिक्थदीप-यात्रा 'इन्दिरागाँधी-क्रीड़ा-परिषद्' स्थानात् आरभ्य 'स्कैंडलपॉइंट' मार्गेण 'रिजमैदान' इत्यत्र समाप्ता अभवत्। अस्मिन् अवसरे प्रश्नपत्रप्रकटन कारणेन आत्मघातं कृतवद्भ्यः छात्रेभ्यः अपि श्रद्धाञ्जलिः प्रदत्ता।

अपरतः, काङ्ग्रेसदलेन शनिवासरे विविधेषु मण्डलेषु अपि प्रदर्शिनानि कृतानि।

सिक्थदीपयात्रायां मुख्यमन्त्री सुखविन्दरसिंहसुक्खु, मन्त्री रोहितठाकुरः, सी.पी.आई.एम. महासचिवः सञ्जयचौहानः, पूर्वविधायकः राकेशसिंघा इत्येतैः सह काङ्ग्रेसविधायकाः सहस्रशः कार्यकर्तारः जनाश्च सम्मीलिताः अभवन्। अस्मिन् अवसरे जनाः करे षट्- प्रदीपान् गृहीत्वा केन्द्रसर्वकारस्य विरुद्धं तीव्रं घोषम् अकुर्वन्।

दैनिक ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः 3 जुलाई 26, 2026 Website- www.himsanskritam.com Email-himsanskrit@gmail.com

# विदेशात् एम.बी.बी.एस. (MBBS) कृतवतां स्नातकानाम् 'इंटर्नशिप' अवधिः एकवर्षं भविष्यति, मुख्यमंत्री सुक्खुमहोदयेन दत्ताः निर्देशाः



**हिमसंस्कृतवार्ताः- शिमला।**
मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खुमहोदयेन पात्रेभ्यः वैदेशिक-चिकित्सा-महाविद्यालयेभ्यः एम. बी. बी. एस. कृतवद्भ्यः कोविड-१९ विभिषिकाकाले उत्पन्नानाम् अपरिहार्य-परिस्थितीनां कारणेन 'ऑनलाइन' माध्यमेन अध्ययनं कृतवद्भ्यः छात्रेभ्यः एकवर्षस्य प्रशिक्षणस्य अनुमतिं प्रदातुं निर्देशाः दत्ताः। मुख्यमन्त्रिणा शनिवासरे छात्रैः सह स्वास्थ्यविभागस्य वरिष्ठ-अधिकारिभिः सह च आयोजितायाः उपवेशनस्य अध्यक्षतां कुर्वता प्रतिपादितं यत् राज्यसर्वकारः प्रभावितानां छात्राणां चिन्तानां समाधानं निष्पक्षेण, व्यावहारिकेण, छात्रहितैषिणा च दृष्टिकोणेन करिष्यति। प्रदेशसर्वकारः एतत् सुनिश्चितं कर्तुं कटिबद्धः अस्ति यत् कोविड-१९ विभिषिकाकाले उत्पन्नानाम् परिस्थितीनां कारणेन प्रभाविताः योग्याः छात्राः कस्यापि प्रकारस्य हानिं न सहेरन्। तेन प्रोक्तं यत् विदेशात् चिकित्सा-स्नातकं कृतवतां छात्राणां 'इंटर्नशिप'-अवधिम् आदाय अनिश्चयः उत्पन्नः अभवत्, यतो हि एकस्यैव शैक्षणिकगणस्य छात्रेभ्यः पृथक्-पृथक् अवधिः निर्धारिता आसीत्। केभ्यश्चित् छात्रेभ्यः एकवर्षस्य 'प्रशिक्षणम्' अनुमता, यदा च तादृशीष्वेव परिस्थितिषु कोविड-१९ काले पठनं कृतवद्भ्यः अन्येभ्यः छात्रेभ्यः वर्षद्वयस्य 'इंटर्नशिप' कर्तुं निर्देशाः दत्ताः। तेन कथितं यत् 'राष्ट्रीय-चिकित्सा- आयोगेन' विभिषिकाकाले ऑनलाइनमाध्यमेन पठितवतां वैदेशिक-चिकित्सा- स्नातकानां कृते प्रतिपूरक- प्रशिक्षण-अवधेः उपयुक्ततायाः आकलनस्य अधिकारः राज्यसर्वकारेभ्यः समर्पितः अस्ति। एन.एम.सी. संस्थायाः प्रावधानानि छात्रैः सोढाः वास्तविकीः कठिनताः च ध्यात्वा राज्यसर्वकारेण पात्र-अभ्यर्थिभ्यः 'इंटर्नशिप' अवधिः एकवर्षं निर्धारितुं निर्णयः गृहीतम्। मुख्यमन्त्रिणा स्वास्थ्यविभागः निर्दिष्टः यत् सर्वाः आवश्यकाः औपचारिकताः शीघ्रं पूरयित्वा आवश्यकाः आदेशाः सद्यः प्रसारणीयाः, येन प्रभाविताः छात्राः अविलम्बं स्वकीयां 'इंटर्नशिप' आरब्धुं पूरयितुं वा शक्नुयुः। अनेन निर्णयेन प्रभावितेभ्यः चिकित्सा-स्नातकेभ्यः महती साहाय्यता लप्स्यते ते च निष्प्रतिबन्धं स्वकीयं चिकित्सा-जीवनम् अग्रे नेतुं शक्ष्यन्ति। अनेन राज्ये चिकित्सा-शिक्षायाः स्वास्थ्य-सेवानाम च गुणवत्ता अपि स्थास्यति। उपवेशने प्रधान-परामर्शकः (मीडिया) नरेशचौहानः, स्वास्थ्यसचिवः आशीषसिंहमारः, चिकित्सा-शिक्षा-निदेशकः डॉ. गोपालबेरी च उपस्थिताः आसन्।

## हिमाचले अधुना 'द्वीप' आनन्दः, प्रदेशस्य अस्मिन् मण्डले सज्जीभविष्यति परियोजना




**हिमसंस्कृतवार्ताः- बिलासपुरम्।**
हिमाचलप्रदेशस्य प्रथमा 'द्वीप-पर्यटन-परियोजना' बिलापुरमण्डलस्य गोविन्दसागरसरसि स्थिते ज्योरीपत्तनस्थाने आगामि- एकमासाभ्यन्तरे पर्यटकेभ्यः आरप्स्यते। अस्याः महत्त्वाकाङ्क्षि-परियोजनायाः माध्यमेन बिलासपुरक्षेत्रं 'इको टूरिज्म', 'वॉटर स्पोर्ट्स', 'एयरो स्पोर्ट्स' 'एडवेंचर टूरिज्म' चेत्येतेषां प्रमुखकेन्द्ररूपेण विकसितं करिष्यते।इयं सूचना उपायुक्तः राहुलकुमारः शनिवासरे 'सोसायटी फॉर टूरिज्म, स्पोर्ट्स, ट्रेड एण्ड एम्प्लॉयमेंट जेनरेशन' इत्यस्याः समीक्षा-उपवेशनस्य अध्यक्षतां कुर्वन् अददत्। उपायुक्तेन उक्तं यत् द्वीप-पर्यटन-परियोजनायाः अन्तर्गतं गोविन्दसागरसरसः मध्ये स्थिताः प्राकृतिकाः द्वीपाः विश्वस्तरीय-पर्यटनस्थलरूपेण विकस्यन्ते। अत्र पर्यटकानां कृते आधुनिका विश्रामदा च आवासव्यवस्था भविष्यति, यत्र ते प्राकृतिक-वातावरणे शान्तिमयं समयं यापयितुं शक्ष्यन्ति। पर्यटकेभ्यः अल्पाहारः, मध्याह्नभोजनं, रात्रिभोजनं च उपलप्स्यते, यस्मिन् स्थानीय-व्यञ्जनानि विशेषरूपेण समाविष्टानि करिष्यन्ते, येन ते बिलासपुरस्य समृद्ध-भोजनसंस्कृतेः अनुभवं कर्तुं शक्नुयुः। तेनोक्तं यत् पर्यटकाः अत्र 'प्री-वेडिंगशूट', मत्स्यग्रहणं, स्थानीय-दर्शनीयस्थलानां भ्रमणं, प्रकृतेः अङ्के विविधानां साहसिक-मनोरञ्जक-गतिविधिनाञ्च आनन्दं ग्रहीतुं शक्ष्यन्ति। स्थानीयकलाकारैः लोकसङ्गीतं सांस्कृतिकाः कार्यक्रमाश्च अपि प्रस्तोष्यन्ते, येन पर्यटकाः हिमाचलस्य समृद्ध-लोकसंस्कृतेः परम्पराणां च परिचयं प्राप्स्यन्ति। स्थानीय-हस्तशिल्पस्य, कृषि-उत्पादानाम्, अन्यासां पारम्परिक-वस्तूनां विक्रयाय चापि विशेषा व्यवस्था विधास्यते। अनेन स्वयंसहायतासमूहेभ्यः, स्थानीय-कलाकारेभ्यः, शिल्पकारेभ्यः, उद्यमिभ्यश्च स्वकीय-उत्पादान् साक्षात् पर्यटकान् यावत् प्रापयितुं अवसरः लप्स्यते। इयं परियोजना स्थानीय-जीविकां, स्वाजीविकां, ग्रामीण-अर्थव्यवस्थां च नूतनां गतिं प्रदातुं महतीं भूमिकां निर्वक्ष्यति। तेन ज्ञापितं यत् बिलासपुरे गोविन्दसागर-सरसः प्रमुखद्वीपाः ज्योरीपत्तनं, धरसानी, भोलू च अण्डमान- निकोबार- द्वीपसमूहस्य शैल्यां विकस्यन्ते। एषः हिमाचलप्रदेशस्य स्वकीये रूपे प्रथमा पर्यटनप्रयासः भविष्यति, या राज्यस्य पर्यटनक्षेत्रे एकं नूतनम् अध्यायं योक्ष्यति। उपवेशने मण्डी-भराडीक्षेत्रे प्रस्तावित-जलक्रीड़ा-गतिविधिनाम् अपि समीक्षा कृता। हितधारकैः जलक्रीडागतिविधिभिः सम्बद्धाः स्थानीयस्तरे समागच्छन्त्यः समस्याः ज्ञापिताः। उपायुक्तेन झण्डूताक्षेत्रस्य उपमण्डलाधिकारी जलक्रीड़ानां कृते उपयुक्तां भूमिं चिह्नितां कर्तुं निर्दिष्टः। साकमेव प्रोक्तं यत् अस्मिन् सन्दर्भे बी.बी.एम.बी. इत्यस्य अधिकारिभिः सह पृथक् उपवेशनम् आयोज्य स्थायी-समाधानं सुनिश्चितं करिष्यते, येन पर्यटन-गतिविधिभ्यः प्रोत्साहनं ददतः उद्यमिनः कस्यापि प्रकारस्य कठिनतायाः सम्मुखीकरणं न कुर्युः।

# केन्द्रीयसंस्कृतविश्वविद्यालये सिरमौरस्य पुत्र्या महकशर्मणा अर्जितः यशः,

## फलितज्योतिषे समस्ते देशे द्वितीयं स्थानम्



**हिमसंस्कृतवार्ता सिरमौरम् / हिमाचलप्रदेशः):**
सिरमौरमण्डलस्य पच्छाद्-तहसीलस्य 'लाना मियूँ' इति ग्रामस्य मेधाविण्या पुत्र्या महकशर्मणा केन्द्रीयसंस्कृतविश्वविद्यालयस्य 'वेदव्यासपरिसरात्' (बलाहर, काङ्गड़ा) आचार्य-(फलितज्योतिष)-परीक्षायाम् अखिलभारतीयस्तरे द्वितीयं स्थानं (2nd Rank) प्राप्य स्वग्रामस्य, मण्डलस्य, सम्पूर्णहिमाचलप्रदेशस्य च नाम अलङ्कृतम्। महकशर्मा आचार्य-(फलितज्योतिष)-पाठ्यक्रमस्य अध्ययनकाले 10 CGPA मध्ये 9.33 CGPA अङ्कान् प्राप्य एतां ऐतिहासिकिं सफलतां प्राप्तवती। उल्लेखनीयम् अस्ति यत् केन्द्रीयसंस्कृतविश्वविद्यालयस्य देशभरे स्थितेषु १४ परिसरेषु ५ सम्बद्धसम्बद्धसंस्कृतमहाविद्यालयेषु (कुलम् १९ परिसरेषु) आयोजितायां फलितज्योतिषविषयस्य परीक्षायां महकशर्मा अखिलभारतीयस्तरे द्वितीयं स्थानं लब्धवती।

## कठिनसङ्घर्षस्य च अनुपममुदाहरणम्

महकशर्मा एकस्मात् साधारण-परिश्रमि-परिवारात् अस्ति। अस्याः पिता श्रीओमप्रकाशशर्मा मण्डलन्यायवादिकार्यालय-नाहनमध्ये चतुर्थश्रेण्याः (Class-4) कर्मचारी रूपेण कार्यरतः अस्ति तथा अस्याः माता श्रीमतीलीलाशर्मा ग्रामे 'आशा-कार्यकर्त्री' (ASHA Worker) रूपेण समाजसेवाम् करोति। महकायाः ग्रामः 'लाना मियूँ' (डाकघरः छपाङ्ग, तहसील पच्छाद्, मण्डलं सिरमौरम्) अस्ति। महकस्य एतया विशेषलब्ध्या सम्पूर्णे क्षेत्रे हर्षस्य लहरी अस्ति। अस्याः सफलातायाम् अस्याः परिवारस्य, ग्रामवासिनाम्, गुरुजनानाम्, क्षेत्रस्य गणमान्यजनानां च तस्यै हार्दिक्यः शुभकामनाः दत्ताः, तस्याः उज्ज्वलभविष्यस्य कामना च कृता।

## प्रथमे स्थाने अस्ति हिमाचलस्यैव अभिषेकः




ध्यातव्यं यत् प्रथमे स्थानेऽपि हिमाचलस्य छात्रः विनोदशर्मा अस्ति। विनोदः द्वितीयेवर्षे फलितज्योतिषविषयस्य छात्रः अस्ति।

## पाकिस्तान-ईरान-देशाभ्यां आहत्य १४,५३९ अफ़गान-शरणार्थी-परिवाराः स्वदेशं प्रत्यावृत्ताः

अफ़गानिस्तान-सर्वकारस्य अनुसारं विगत-एकमासे प्रतिवेशि-देशाभ्यां पाकिस्तानेन ईरानेन च आहत्य १४,५३९ अफ़गान-शरणार्थी-परिवाराः स्वदेशं प्रत्यागताः सन्ति। अधुना यावत् प्रत्यागतानाम् अफ़गान-शरणार्थिनां कुल-सङ्ख्या १७,२७७ संजाता। एतेषु अधिकांशाः शरणार्थिनः पाकिस्तानात प्रत्यावृत्ताः। अफ़गानिस्तान-सर्वकारस्य उपप्रवक्ता हमदुल्ला फ़ितरतः सामाजिक-माध्यम-सञ्चारे अकथयत् यत् प्रत्यागच्छन्तः जनाः पश्चिमी-हेरात-प्रान्ते इस्लाम-क़ाला-सीमया, पूर्वी-नंगरहार-प्रान्ते तोरखम-सीमया, दक्षिणी-कंधार-प्रान्ते स्पिन-बोल्दक-द्वारेण, पश्चिमी-निमरोज़-प्रान्ते पुल-ए-अबरेशम-द्वारेण, दक्षिणी-हेलमंद-प्रान्ते च बहरामचा-मार्गेण अफ़गानिस्तानम् प्राविशन्।

# भारतीयज्ञानपरम्परायां संवादस्य भूमिका महत्त्वपूर्णा : विद्वज्जनानां मतम्




**हिमसंस्कृतवार्ता, सत्येन्द्र पाठकः लखनऊ ।** अखिलभारतीयसंस्कृतपरिषदः, लखनऊ-नगरस्य अलीगञ्जस्थिते देववाणी-भवने "भारतीयज्ञानपरम्परायां शिक्षणपद्धतिः संवादश्च" इति विषये विशिष्टव्याख्यानं विद्वत्सङ्गोष्ठी च आयोजिता। अस्याः सङ्गोष्ठ्याः मुख्यातिथित्वं आर्यमहिला-पी.जी.-महाविद्यालयस्य शाहजहाँपुरस्थितस्य प्राचार्या प्रो० सुरचना त्रिवेदी महोदया अकरोत्। अध्यक्षतां परिषदः अध्यक्षः डॉ० चन्द्रभूषण त्रिपाठी महोदयः चकार। मुख्यवक्तारूपेण केन्द्रीयसंस्कृतविश्वविद्यालयस्य लखनऊपरिसरस्य शिक्षाविभागस्य वरिष्ठप्राध्यापकः डॉ० रुद्रनारायण नरसिंह मिश्रः तथा विशिष्टवक्त्रीरूपेण इलाहाबादविश्वविद्यालयस्य संस्कृतविभागस्य वरिष्ठप्राध्यापिका डॉ० रेनू कोछड़ शर्मा महोदया स्वविचारान् प्रस्तुतवत्यौ।वक्तारः भारतीयज्ञानपरम्परायां संवादस्य, गुरु-शिष्यपरम्परायाः, शिक्षणपद्धतेः तथा मूल्यपरकशिक्षायाः महत्त्वं प्रतिपादयन्तः अकथयन् यत् भारतीयशिक्षाप्रणाल्याः उद्देश्यं केवलं ज्ञानार्जनं न, अपितु चरित्रनिर्माणं सर्वाङ्गीणविकासश्च अस्ति। मुख्यातिथिः प्रो० सुरचना त्रिवेदी महोदया राष्ट्रियशिक्षानीतेः–२०२० इत्यस्य सन्दर्भे भारतीयज्ञानपरम्परां आधुनिकशिक्षया सह सम्बद्धु आवश्यकताम् अवोचत्।कार्यक्रमस्य शुभारम्भः रञ्जना निखिल-महोदयया वैदिकमङ्गलाचरणेन तथा निशान्त शुक्ल-महोदयेन लौकिकमङ्गलाचरणेन अभवत्। स्वागतगीतं कीर्तिः, समरीता तथा प्रिया पाण्डेय प्रस्तुतवत्यः। कार्यक्रमस्य सञ्चालनं डॉ० सन्दीप कुमार महोदयः अकरोत् तथा संयोजिका डॉ० पत्रिका जैन महोदया धन्यवादज्ञापनम् अकरोत्। अस्मिन् विद्वत्सङ्गोष्ठ्याम् पञ्चाशताधिकाः विद्वांसः, शोधच्छात्राः विद्यार्थिनश्च उपस्थिताः आसन्।

# बोकारो-नगरे सङ्गीत-सन्ध्यायां मुकेश-राजेशखन्नयोः स्मरणम्



**हिमसंस्कृतवार्ता -सौरभः दे बोकारः।** सुप्रसिद्धस्य चलचित्र-पार्श्वगायकस्य मुकेशस्य जयन्त्याः तथा भारतीयचलच्चित्रजगतः प्रथमस्य सुपरस्टार-अभिनेता राजेशखन्नस्य पुण्यतिथेः उपलक्ष्ये बोकारो-नगरस्य सेक्टर-१२ बी-क्षेत्रे स्वरागिणी म्यूजिकल् ग्रुप् इत्यस्य आयोजनत्वेन भावपूर्णा सङ्गीत-सन्ध्या सम्पन्ना। कार्यक्रमस्य प्रारम्भे कलाकारैः उभयोः महानुभावयोः चित्रयोः माल्यार्पणं पुष्पाञ्जलिश्च समर्पिता।अवसरे वक्तारः मुकेशस्य मधुरस्वरं, भावपूर्णगायनशैलीं च स्मृत्वा तस्य भारतीयचलच्चित्रसङ्गीते अमूल्यं योगदानम् अभिनन्दितवन्तः। तद्वत् अभिनेता राजेशखन्नस्य अभिनयसामर्थ्यं भारतीयचलच्चित्रजगति तस्य स्वर्णिमस्थानं च विशेषरूपेण प्रशंसितम्। सङ्गीत-सन्ध्यायां विविधैः गायक-गायिकाभिः मुकेशस्य प्रसिद्धगीतानि तथा राजेशखन्नेन अभिनीतचलच्चित्रेषु लोकप्रियगीतानि सुमधुरस्वरेण प्रस्तुतानि। भावपूर्णाभिः सङ्गीतप्रस्तुतिभिः समग्रः कार्यक्रमः श्रद्धा-स्मृतिभावैः परिपूर्णः अभवत्। उपस्थिताः सङ्गीतप्रेमिणः कलाकाराणां प्रस्तुतीः मुक्तकण्ठेन प्रशशंसुः तथा उभाभ्यां महानुभावाभ्यां भावपूर्णां श्रद्धाञ्जलिं समर्पितवन्तः।

# सर्वकारः अद्य लोकसभायां 'सार्वजनिक-परीक्षाः (अनुचित-साधन-निवारण) संशोधन-विधेयकम् आनयति

**हिमसंस्कृतवार्ता।** सर्वकारः सोमवासरे लोकसभायां 'सार्वजनिक-परीक्षाः (अनुचित-साधन-निवारण) संशोधन-विधेयकम्, २०२६' प्रस्तुतं करिष्यति। एतत् विधेयकं सदनस्य सोमवासरस्य कार्यसूच्यां सम्मिलितम् अस्ति। अस्य विधेयकस्य उद्देश्यं 'सार्वजनिक-परीक्षा (अनुचित-साधन-निवारण) अधिनियम, २०२४' इत्यस्मिन् संशोधनं करणम् अस्ति। केंद्रीयमन्त्री डॉ. जितेन्द्र सिंहः एतत् विधेयकं उपस्थापयिष्यति। केंद्रीय-मन्त्रिमण्डलेन 'पेपर-लीक' तथा परीक्षासु अनियमिततानां प्रकरणेषु ह्यः 'फास्ट-ट्रैक' (त्वरित) न्यायालायानां स्थापनां तथा कदाचारे कठोर-दण्डं सुनिश्चित-करण-सम्बन्धिनः विधेयकस्य प्रारूपाय स्वीकृतिः दत्ता आसीत्।





# "विनोदकणिका"
# "भार्याणां प्रकाराः"

{१} अलसाः भार्याः- स्वहस्ते चायं निर्मायतु तथा च एकं चषकं परिमितं चायं माम अपि यच्छतु।
{२} बिभीषिका भार्याः- मुक्तकर्णे शृणुत, अस्मिन् गृहे अहं वसामि वा भवतः माता।
{३} इतिहासप्रेमी भार्याः- अहं सर्व हि जानामि यद् भवतः कुलं कथम् अस्ति तद्।
{४} भविष्यद्वाणी/ भविष्यकथनकर्ती भार्याः- अग्रिम सप्तमजन्मनि मम सादृश्या भार्या न लभेय।
{५} भ्रान्ता/ भ्रमिता भार्याः- त्वं मनुष्यः असि वा पादांशुकम्?
{६} स्वार्थी भार्याः- एषा शाटिका मम माता दत्तवती। भवतः स्वसृणां कृते न।
{७} शङ्किता भार्याः- भवान् मम सपत्न्या सह चलभाषयन्त्रं वार्तां करोति वा?
{८} अर्थशास्त्री भार्याः- भवता समीपे कुबेरस्य राजकोषः अस्ति वा? इयत अत्यल्पे वेतने अहं प्रतिदिनं किलाटं/ पनीरं पचामि?
{९} धार्मिक भार्याः- कृतज्ञतां वदतु यत् भवन्तं मम सादृशी भार्या प्राप्ता।
{१०} सर्वेषाम् भार्याः- मम भाग्ये त्वमेव लिखितम् असि?
स्वभार्याया लक्षणं जानातु, लिखतु च। 🤗😂🤣😃

**डा. वर्षा प्रकाश टोणगांवकर पुणे, महाराष्ट्रम्**



हिमसंस्कृतवार्ताः, ईदरधीररजः

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये। अद्य मया एका विचित्रा वार्ता श्रुता। केन्यादेशे एकेन चौरेण जनाः दष्टाः, तेषां धनानि च हृतानि।

**काव्या-** अहो भयङ्करम्! सः चोरः रक्तपः इव अस्ति। मया अन्या अपि वार्ता पठिता। खगोलशास्त्रज्ञैः अन्तरिक्षे गुरु-ग्रह-सदृशः बाह्य- उपग्रहः दृष्टः अस्ति। सः उपग्रहः एकां सूक्ष्मतारां परिक्रामति।


**नन्दिनी-** आश्चर्यम्! अन्तरिक्षम् अद्भुतैः रहस्यैः पूर्णम् अस्ति। सम्प्रति एका हास्यास्पदा घटना श्रूयताम्। केनाडादेशे एकेन मूढयुवकेन तीव्रगत्या द्विचक्रवाहनस्य अग्रचक्रम् आरक्षकस्य पुरतः एव उत्थापितम्! आरक्षकेन तस्य यानचालनपत्रं हृतम्, दण्डः च आरोपितः।

**काव्या-** अतीव मूर्खतापूर्णं कार्यम् एतत्! नियमपालनं सर्वदा आवश्यकम्। अन्ते एका गूढा वार्ता। चिलीदेशे अन्धकारमये मार्गे स्थितं भूतसदृशं रूपं चालकेन चित्राङ्कनयन्त्रेण गृहीतम्। तथैव इक्वेडोरदेशे समाधिसमीपे जलं स्वयमेव भ्रान्तम्।

**नन्दिनी-** अहो अयं संसारः विस्मयपूरितः अस्ति! काव्ये, एतासां विचित्राणां वार्ताणां कथनाय तुभ्यं धन्यवादः। पुनर्मेलिष्यामः।

# प्राचीन-बौद्धस्थलः सारनाथः यूनेस्को-संस्थायाः विश्व-धरोहर-सूच्यां सम्मिलितः






हिमसंस्कृतवार्ताः नवदेहली।
प्राचीन-बौद्धस्थलः सारनाथः यूनेस्को-संस्थायाः विश्व-धरोहर-सूच्यां सम्मिलितः कृतः। विश्वस्य अतिपवित्रेषु बौद्ध-तीर्थस्थलेषु अन्यतमः सारनाथः दक्षिणकोरियादेशस्य बुसान-नगरे प्रचलतः यूनेस्को-विश्वधरोहर-समित्याः अष्टचत्वारिंशत्तमे (४८) सत्रे यूनेस्को-विश्वधरोहर-सूच्यां सम्मिलितः अभवत्। भारतीय-पुरातत्त्व-सर्वेक्षण-विभागेन (ए.एस.आई.) सामाजिक-माध्यम-सञ्चारे उक्तं यत् सारनाथः भारतस्य पञ्चचत्वारिंशत्तमः (४५) विश्वधरोहर-स्थलः सञ्जातः, येन वैश्विक-मञ्चे देशस्य सांस्कृतिक-विरासत-परम्परा अधिका सुदृढा जाता।सारनाथः बौद्धधर्मस्य अतीव महत्त्वपूर्णः पवित्रः च स्थलः अस्ति। उत्तरप्रदेशस्य वाराणस्याः लगभग १० किलोमीटर दूरे स्थितः अस्मिन् ऐतिहासिक-स्थले भगवान् बुद्धः ज्ञानप्राप्त्यनन्तरं स्वस्य प्रथमम् उपदेशं दत्तवान् आसीत्।
उपराष्ट्रपतिः सी.पी. राधाकृष्णन् उक्तवान् यत् प्राचीन-बौद्धस्थलस्य सारनाथस्य यूनेस्को-विश्वधरोहर-सूच्यां सम्मेलनं प्रत्येकस्य भारतीयस्य कृते अतीव गौरवस्य क्षणः अस्ति। सामाजिक-माध्यम-सञ्चारे श्रीराधाकृष्णन् अकथयत् यत् सारनाथः शांतेः, ज्ञानस्य, करुणायाः च एकः चिरस्थायी प्रतीकः अस्ति, यः भारतस्य शाश्वत-आध्यात्मिक-दार्शनिक-परम्परायाः प्रतिनिधित्वं करोति। प्रधानमन्त्री नरेन्द्रमोदी प्रसन्नतां प्रकटयन् एतत् प्रत्येकस्य भारतीयस्य कृते गौरवस्य क्षणम् अकथयत्। सामाजिक-माध्यम-सञ्चारे श्रीमोदी अकथयत् यत् सारनाथस्य भगवता बुद्धेन सह गभीरः सम्बन्धः अस्ति, यस्य ज्ञानस्य, करुणायाः, सद्भावस्य च शाश्वत-सन्देशेन विश्वं प्रेरितम् अस्ति। प्रधानमन्त्री अकथयत् यत् एषा मान्यता देशस्य समृद्ध-सांस्कृतिक-आध्यात्मिक-परम्परायाः सम्मानं करोति। श्रीमोदी अकथयत् यत् अनेन विश्वभरस्य जनाः सारनाथम् आगन्तुं भगवतः बुद्धस्य आदर्शैः सह सम्बद्धाः भवितुं च प्रेरिताः भविष्यन्ति।
संस्कृति-पर्यटनमन्त्री गजेन्द्रसिंहशेखावतः अपि एतत् भारतस्य सांस्कृतिक-परम्परायाः कृते एकं महत्त्वपूर्णं क्षणम् अकथयत्। तेन उक्तं यत् एतत् मानवते कृते भारतीय-सभ्यतायाः गभीर-आध्यात्मिक-दार्शनिक-योगदानं दर्शयति। केंद्रीय-गृह मन्त्री अमितशाहः उक्तवान् यत् उत्तरप्रदेशस्य प्राचीन-बौद्धस्थलस्य सारनाथस्य यूनेस्को-विश्वधरोहर-सूच्यां सम्मेलनेन देशस्य सांस्कृतिक-गौरवं वर्धितम्। श्रीशाहः सामाजिक-माध्यम-सञ्चारे अकथयत् यत् सारनाथः भगवता बुद्धेन सह सम्बद्धायाः भारतस्य प्राचीन-विरासतयाः प्रतीकः अस्ति। गृह मन्त्री अकथयत् यत् सारनाथस्य यूनेस्को-सूच्यां सम्मेलनेन बुद्धस्य ज्ञानस्य प्रकाशः अधिकेभ्यः जनेभ्यः यावत् प्राप्स्यति तथा च तान् श्रेष्ठ-संसारस्य कृते शांतेः ज्ञानोदयस्य च आदर्शान् अङ्गीकर्तुं प्रेरयिष्यति।

# शिक्षामन्त्रिणः त्यागानन्तरं सीजेपी-संस्थया स्वकीयम् आन्दोलनं प्रत्याहृतम्



सर्वकारेण याचनानां स्वीकारानन्तरं सीजेपी-संस्थया स्वकीयम् आन्दोलनं प्रत्याहृतम्। केंद्रीयमन्त्री जे.पी. नड्डा डॉ. जितेन्द्रसिंहः च सीजेपी-प्रतिनिधिमण्डलेन सह तृतीय-चरणस्य चर्चाम् अकुरुताम्। अस्यां परीक्षाप्रणाल्याम् परिष्कारस्य 'पेपर-लीक' (प्रश्नपत्र-प्रकटन) निवारणस्य उपायानां च सम्बद्ध-याचनासु ध्यानं केन्द्रितं कृतम्। पश्चात् श्री-जे.पी.-नड्डा नवदेहल्यां प्रतिनिधिमण्डलेन सह संयुक्ते वार्ताहर-सम्मेलने अकथयत् यत् सर्वकारेण एषा याचना स्वीकृता यत् प्रदर्शनकारिणाम् उपरि कापि कार्यानुष्ठितिः न करिष्यते नापि कापि प्राथमिकी (एफ.आई.आर.) पञ्जीकृता भविष्यति। श्रीनड्डा अकथयत् यत् सर्वकारेण एतदपि स्वीकृतं यत् यदि कापि प्राथमिकी पञ्जीकृता अस्ति, तर्हि सा प्रत्याहृता भविष्यति अस्याः प्रतिलिपयः अपि उपलब्धाः करिष्यन्ते। नीट-यूजी-प्रश्नपत्र-प्रकटनानन्तरं आत्महत्यां कृतवतां परिवाराणां कृते क्षतिपूर्तेः विषये श्रीनड्डा अकथयत् यत् सर्वकारस्य तैः सह पूर्णसहानुभूतिः अस्ति, सः च नियमानाम् उपनियमानां च अनुगुणं अधिकतम-क्षतिपूर्तिं सुनिश्चितं करिष्यति।परीक्षा-परिष्कारेषु सीजेपी-संस्थायाः पञ्चसूत्रीय-प्रस्तावे श्रीनड्डा अकथयत् यत् सर्वकारः अस्य प्रस्तावस्य उपरि गभीरतापूर्वकं विचारं करिष्यति, तैः सह विचारविमर्शानन्तरं यत्किञ्चिद् सम्भवं भविष्यति, तत् करिष्यति।प्रतिनिधिमण्डलस्य मुख्य-प्रवक्ता सौरभदासः सद्भावेन आन्दोलन-प्रत्याहरणस्य घोषणाम् अकरोत्, आशां च प्राकटयत् यत् सम्मताः नियमाः निर्धारित-समयावधेः अन्तः पूर्णतां गमिष्यन्ति।

# स्क्वैशक्रीडा- भारतस्य अनाहत-सिंहः विश्व-कनिष्ठ-स्क्वैश-स्पर्धायाः उपाधिं जित्वा इतिहासम् अरचयत्



भारतस्य स्क्वैश-क्रीडिका अनाहत-सिंहः शनिवासरे मिस्र-देशस्य रुकैया-सलेम-वर्गाम् पराजित्य विश्व-कनिष्ठ-स्क्वैश-व्यक्तिगत-स्पर्धायाः (वर्ल्ड जूनियर स्क्वैश इंडिविजुअल चैंपियनशिप) उपाधिं जित्वा इतिहासम् अरचयत्। सा एताम् उपलब्धिं प्राप्तवती प्रथमा भारतीया क्रीडिका अभवत्। विश्व-क्रमतायां (रैंकिंग) विंशतितमे (२०) स्थाने स्थिता, स्पर्धायाः च शीर्ष-वरीयता-प्राप्ता अनाहतः महिला-वर्गस्य अन्तिम-क्रीडायां (फाइनल) रुकैया-वर्गाम् प्रत्यक्ष-क्रीडासु ११-३, ११-७, ११-९ इति अङ्कान्तरेण पराजित्य वर्तुलं शानदारं विजयं प्राप्नोत्। परह्य स्क्वैश-क्रीडिका अनाहत-सिंहः इतिहासम् रचयित्वा विश्व-कनिष्ठ-स्क्वैश-स्पर्धायाः महिला-एकल-वर्गस्य अन्तिम-क्रीडायां स्थानं कृतवती। सा केनाडा-देशस्य ओंटारियो-नगरे क्रीडिते उपांत्यचक्रे मिस्र-देशस्य बार्ब-सामेह-वर्गाम् ३-१ इति अङ्कान्तरेण पराजितवती। अन्तिम-क्रीडायाम् (फाइनल) अनाहतस्य सम्मुखीकरणं मिस्र-देशस्य रुकैया-सलेम-वर्गया सह अभवत्।मिस्र-देशस्य रुकैया-सलेम-वर्गाम् पराजित्य विश्व-कनिष्ठ-स्क्वैश-व्यक्तिगत-स्पर्धायाः (वर्ल्ड जूनियर स्क्वैश इंडिविजुअल चैंपियनशिप) उपाधिं जित्वा इतिहासम् अरचयत्।

# राष्ट्रमण्डल-क्रीडासु भारतम् प्रथमं पदकं प्राप्नोत्, झण्डू-कुमारः पुरुषाणां 'हेवीवेट पैरा'-भारोत्तोलने कांस्यपदकं जितवान्



**हिमसंस्कृतवार्ता।** ग्लास्गो-नगरे २०२६ तमस्य राष्ट्रमण्डल-क्रीडासु (कॉमनवेल्थ गेम्स) भारतेन स्वस्य प्रथमं पदकं जितम्। 'पैरा-पावरलिफ्टिंग' इत्यस्य पुरुष-'हैवीवेट'-प्रतिस्पर्धायां झण्डू-कुमारः कांस्यपदकं स्वनाम्ना अकरोत्।बिहारस्य नालन्दा-मण्डलस्य निवासी झण्डू-कुमारः १९० किलोग्राम्-भारम् उत्थाप्य तृतीयं स्थानम् प्राप्तवान्। सः १९६ किलोग्राम्-भारस्य कीर्तिमयं (रिकॉर्ड) प्रयासम् अपि अकरोत्, किन्तु तं पूर्णं कर्तुं नाशकत्।'लाइटवेट'-वर्गे अशोक-मलिकः चतुर्थे तथा च परमजीत-कुमारः सप्तमे स्थाने आस्ताम्। महिला-वर्गे जसप्रीत-कौरः षष्ठे सुमन-देवी च सप्तमे स्थाने आस्ताम्। झण्डू-कुमारः पोलियो-रोगेण आर्थिक-काठिन्यैः च ग्रस्तः सन् अपि एतां उपलब्धिम् प्राप्तवान्। प्रधानमन्त्री नरेन्द्रमोदी स्कॉटलैण्डस्य ग्लासगो-नगरे आयोजितायाम् राष्ट्रमण्डल-क्रीडायाम् भारतस्य कृते पदकविजेत्रे 'पैरा'-क्रीडकाय झण्डू-कुमाराय वर्धापनानि दत्तवान्। झण्डू-कुमारः पुरुषाणां 'हेवीवेट पैरा-पावरलिफ्टिंग'-प्रतिस्पर्धायां कांस्यपदकं जितवान्।सामाजिक-माध्यम-सञ्चारे प्रधानमन्त्री कुमारस्य प्रदर्शनं उत्कृष्टं कथयन् अकथयत् यत् एषा उपलब्धिः तस्य अदम्य-शक्तेः, अचलायाः दृढ-प्रतिज्ञायाः, वर्षाणां च अनुशासित-प्रयासस्य सशक्तम् उदाहरणम् अस्ति। श्रीमोदी अकथयत् यत् सर्वविध-आह्वानानां सामनां कृत्वा अन्तर्राष्ट्रिय-मञ्चे उत्कृष्टं प्रदर्शनं कृत्वा कुमारः सम्पूर्णं देशं गौरवान्वितम् अकरोत् अनन्तान् भारतीयान् च प्रेरितवान्।